**मुख्यवार्ता:**

- रामनवमीपर्वण: शभावसरे अद्य प्रधानमन्त्री श्री नरेन्द्रमोदी तमिलनाडुराज्यस्य नवीन पम्बन-रेल-सेतो: उद्घाटनं विहितवान्।
- प्रधानमन्त्रिण: नरेन्द्रमोदिन: श्रीलङ्कादेशस्य त्रिदिवसीया यात्रा सम्पन्ना। प्रधानमन्त्रिण: श्रीमोदिन: इयं श्रीलङ्कादेशस्य राजकीययात्रा अस्मै द्वीपाय अस्याभ्यन्तरे च सम्पर्क सैविध्याय एका कीर्तिमानसम्भृता यात्रा आसीत्।
- अद्य अशेषे द्वि देशे सहर्षं सश्रद्धं च रामनवमी समाचर्यमाणास्ति। सर्वत्रैव तावत् श्रद्धातिरेक: अनुभूयमान:।
- संयुक्तराज्यामेरिका-देशस्य सीमाशुल्क-प्रतिनिधयः राष्ट्रपते: डोनल्ड् ट्रम्पस्य एकपक्षीयं दश प्रतिशतं शुल्कं बहूनां देशानाम् आयातानाम् उपरि सङ्गृहीतुं स्व कार्यं आरभन्त।
- आई. पी. एल. टी-ट्वेंटी क्रिकेट प्रतिस्पर्धायां सनराईजर्स हैदराबाद दलं गुजरात टाटन्स दलं सम्मुखीकरिष्यति।

**प्रधानमन्त्री – तमिलनाडु**

रामनवमीपर्वण: शभावसरे अद्य प्रधानमन्त्री श्री नरेन्द्रमोदी तमिलनाडुराज्यस्य नवीन पम्बन-रेल-सेतो: उद्घाटनं विहितवान्। प्रधानमन्त्रिणा तमिलनाडौ त्रिशतकोट्यधिकाष्ट-सहस्ररुप्यकाणां विभिन्नानां विकासात्मक रेल-मार्ग-परियोजनानानम् अधारशिला च संस्थाप्य राष्ट्राय समर्पिता। तेनोदीरितं यत् तमिलनाडो: विकास: राष्ट्रस्य विकासे योगदानमस्ति। परियोजनेयं रामनवम्यां उपहारवद् वर्तते इति असौ उल्लिखितवान्। सममेव संगम-साहित्ये भगवत: रामस्य उल्लेखम् असौ अकरोत्। तेनोक्तं यत् अस्मिन् दिवसे प्राचीन रामेश्वरम् मंदिरे पूजा-अर्चना अपि च परियोजनाया: समर्पणं च अलौकिक क्षणवत् अस्ति।

अयं रेलसेतु: वास्तुकलाया: एक: अद्भुत: प्रतिदर्शो विद्यते यो हि देशस्य प्रथम: वर्टिकललिफ्ट इति ऊर्ध्वाधरोन्नयन – सागरीयसेतु: अस्ति। असौ तावत् अस्याद्वितीयकार्यस्य कृते निर्माणकर्तृभ्य: च धन्यवादज्ञापनं विहितवान्। श्रीमोदी उक्तवान् यत् अनया परियोजनया व्यापार:, पर्यटनं च वर्धिष्यते अपि च जनेभ्य: वृल्यवसरा: लप्स्यन्ते।

**प्रधानमन्त्री -श्रीलङ्का**

प्रधानमन्त्रिण: नरेन्द्रमोदिन: श्रीलङ्कादेशस्य त्रिदिवसीया यात्रा सम्पन्ना। प्रधानमन्त्रिण: श्रीमोदिन: इयं श्रीलङ्कादेशस्य राजकीययात्रा अस्मै द्वीपाय अस्याभ्यन्तरे च सम्पर्क सौविध्याय एका कीर्तिमानसम्भृता यात्रा आसीत्। प्रधानमन्त्री नरेन्द्रमोदी श्रीलङ्का-देशीय: राष्ट्रपति: अनुरा-कुमरा-दिस्सानायके इत्यसौ च अद्य श्रीलङ्काया: अनुराधापुरायाम् महत्त्वपूर्णानां रेलवे-परियोजनानाम् उद्घाटनं अकुरूताम्। एकस्मिन् सामाजिकान्तर्जालीय पटले श्रीमोदी समुदीरितवान् यत् इयं यात्रा द्वयो: देशयो: मध्ये घनिष्ठ सांस्कृतिकं आध्यात्मिकं सभ्यतागतं च सम्बन्धानां पुष्टि: वर्तते। श्री मोदी महोदयस्य श्री दिसानायके इत्यस्य साकं द्विपक्षीया वार्ता अपि सञ्जाता। अवसरेऽस्मिन् भारतीय मत्स्यपालकानां मुक्ति विषये च दौ नेतारौ विमर्शं अकुरुताम्। विदेशसचिव: विक्रममिस्री अवोचत् यत् वार्ताया: अनन्तरं श्रीलङ्का प्रशासनेन एकादश भारतीय मत्स्यपालकानां मुक्ति: अपि कृता।

**प्रधानमन्त्री – रामनवमी**

अद्य अशेषे द्वि देशे सहर्षं सश्रद्धं च रामनवमी समाचर्यमाणास्ति। सर्वत्रैव तावत् श्रद्धातिरेक: अनुभूयमान:। अवसरेऽस्मिन् राष्ट्रपति: पदासीना द्रौपदी मुर्मु: सर्वेभ्य: देशवासिभ्य: शुभकामना: ख्यापितवती। अथ देशवासिन: श्रीराम-दर्शनत्वं भजेयु: इत्यपि तत्पक्षत: विशेषाग्रह: जात:। रामनवमीपर्वणि रामजन्मभूमिस्थले अयोध्यामन्दिरे विशेषानुष्ठानं च विधीयते। अयोध्यायां सर्वत्रैव प्रसन्नता दरिदृश्यते। जय श्री राम इति उद्घोष: च मन्दिरं परित: श्रूयते। अद्य मध्याहने द्वादशवादने सूर्य किरणै: रामस्य ललाटे तिलकं सुशोभ्यमासीत्। अद्वितीय: दृश्योऽयं प्राय: निमेषचतुष्टयं यावत् आसीत्। अयोध्यायां द्विलक्ष-दीपप्रज्वालनं च भविष्यति।

अयं उत्सवः भगवतः विष्णोः सप्तमावतारस्य रामस्यावतरणस्य प्रतीकमस्ति। रामनवमी चैत्रमासस्य नवमे दिने आचर्यते। प्रधानमन्त्रिणा नरेन्द्रमोदिना रामनवमीपर्वणावसरे प्रजाभ्य: शुभकामना: प्रकटिता:। सामाजिकान्तर्जालीय पटले सः प्रार्थयत् यत् भगवतः श्रीरामस्य आशीर्वादः अस्माकं सर्वेषाम् उपरि भवेदिति।

**अमेरिका-ट्रम्प**

संयुक्तराज्यामेरिका-देशस्य सीमाशुल्क-प्रतिनिधयः राष्ट्रपते: डोनल्ड् ट्रम्पस्य एकपक्षीयं दश प्रतिशतं शुल्कं बहूनां देशानाम् आयातानाम् उपरि सङ्गृहीतुं स्व कार्यं आरभन्त। अमरीकिय- आयातकैः प्रदीयमानं प्रारम्भिकं दश-प्रतिशतं आधारभूत-शुल्कं शनिवासरस्य मध्यरात्रितः अमरीकिय - नौकाश्रयेषु, विमानस्थानकेषु, सीमाशुल्क-भण्डारेषु च प्रवृत्तम् अभवत्। आस्ट्रेलिया, ब्रिटन्, कोलम्बिया, अर्जेण्टीना, मिस्र, सऊदी अरब चेत्येतेषु देशेषु दश-प्रतिशत-शुल्कस्य प्रथम: प्रकोपभाग: अभवत्। शनिवासरे मध्यरात्रौ जलस्य उपरि कार्गोस् कृते अनुग्रह-अवधिः नास्ति इति प्रेषकान् प्रति U.S. कस्टम्स् एण्ड् बॉर्डर् प्रोटेक्षन् इति वार्ता सूचयति। अत्रान्तरे, राष्ट्रपते: डोनल्ड ट्रम्पस्य आर्थिकनीतीनां सङ्घीयं शासनं अल्पं कर्तुं योजनां च विरुद्ध्य ह्यः पंचांशत् अमरीकीय राज्येषु वैश्विकरूपेण च लक्षाः जनाः विरोधम् अकुर्वन्। राजधानीषु, सङ्घीय-भवनेषु, नगर-सभागृहेषु च चतुर्दशशततः अधिकाः "हैंड-आफ़्" इति सभाः आयोजिताः, यत्र वाशिङ्ग्टन्-नगरस्य नेशनल-माल्, D.C. इत्यत्र सर्वाधिकं मतदानं जातम्। विदेशेषु अपि प्रदर्शनानि अभवन्, बर्लिन्-नगरे अपि, यत्र विरोधिनः विदेशेषु अमेरिकीय-जनान् अस्मिन् आन्दोलने सम्मिलयितुं प्रार्थयन्ति स्म। आयोजकाः सर्वकारस्य कोट्यधिपति-अधिग्रहणं, सामाजिककार्यक्रमेषु क्षयः, अप्रवासिनां तथा सीमान्तवर्गीयेभ्यः समुदायेभ्यः उपरि आक्रमणानि च समाप्तुं याचनाम् अकुर्वन्।

व्हाइट-हाउस इत्ययम् अवदत् यत् ट्रम्प: योग्य-अमेरिकानां कृते सामाजिक-सुरक्षायाः, मेडिकेयर् इत्यस्य, मेडिकेड् इत्यस्य च रक्षणाय प्रतिबद्धः अस्ति इति, तथा च डेमोक्राट्-जनाः अघोषितप्रवासिनां कृते लाभाः विस्तारयित्वा तान् कार्यक्रमान् संकटाय कल्पयन्ति इति आरोपं कृतवन्तः।

**आई०पीएल्०-क्रीडायां**

आई. पी. एल. टी-ट्वेंटी क्रिकेट प्रतिस्पर्धायां सनराईजर्स हैदराबाद दलं गुजरात टाटन्स दलं सम्मुखीकरिष्यति। इयं स्पर्धा तावत् सायं सार्ध सप्त वादने राजीव गान्धी अन्ताराष्ट्रीय क्रीडाङ्गणे भविष्यति।

**।। ◻ति वार्ता:।।**